सुदर्शनषडक्षरी
महामंत्रः प्रारंभः

1

श्रीमतेरामानुजायनमः॥ अस्यश्रीसुदर्शनषडक्षरीमहामंत्रस्य अहिर्बुध्न्यो
भगवान् ऋषिः अनुष्टुप् छन्दः श्रीसुदर्शनरूपीपरमात्मादेवता सं बीजं
सहस्रारेति शक्तिः हुंफट् इति कीलकम् ममभूतप्रेतपिशाचोच्चाटननिवार
णापूर्वकपरमंत्रपरयंत्रपरतंत्रनिवारणपूर्वकपरकृतमारणमोहन
स्तम्भनाकर्षणोच्चाटननिवारणपूर्वकस्वमंत्रस्वयंत्रस्वतं॰त्रस्थाप
नार्थे अस्यश्रीसुदर्शनषडक्षरीमहामंत्रजपेविनियोगः ॐ अचक्रा ॥१॥
॥१॥ य अंगुष्ठाभ्यांनमः ॐ विचक्राय तर्जनीभ्यांनमः ॐ सुचक्राय
मध्यमाभ्यांनमः ॐ ज्वालाचक्राय अनामिकाभ्यांनमः ॐ असु
रान्तकचक्राय कनिष्ठिकाभ्यांनमः ॐ सर्वलोकरक्षणचक्राय कर
तलकरपृष्ठाभ्यांनमः ॐ अचक्राय ज्ञानाय हृदयायनमः ॐ वि
चक्राय ऐश्वर्याय शिरसेस्वाहा ॐ सुचक्राय शक्त्यै शिखायै वौषट्

सुदर्शनषडक्षरी
महामंत्रसमाप्तं

मि अथ ध्यानम् चक्राम्बुजे समासीनं चक्राद्यायुधभूषणम् ॥ चक्रमात्रा
दिदेवं च चक्रमंत्राणि चिन्तयेत् ॥ सर्वात्मभावसंपूर्णमष्टबाहुं सुदर्शनम्
। दंष्ट्राकरालवदनं भयस्यापि भयंकरम् ऊर्ध्वपिंगलकेशाढ्यं ज्वाला
मालासमाकुलम् अप्रधर्ष्यमनिर्देश्यपंचप्राणाद्याप्रविग्रहम् अष्टा
युधपरीवारमष्टचक्रसमन्वितम् अष्टारं चक्रमत्युग्रम् मुशलं चां
कुशं तथा पद्मं च शिरोपार्श्वे चतुर्भिर्बाहुभिर्धृतम् वामतः शंख
सशार चापपाशगदाधरम् रक्तवस्त्रधरं देवं रक्तमाल्योपशोभितम्
रक्तचन्दनलिप्तांगं रक्तवर्ष्मिवाम्बुदम् दिव्यरत्नविचित्रेणामु
कुटेन विराजितम् श्रीवत्सकौस्तुभोरस्कं दीप्तकुण्डलधारिणम्
हारनूपुरकेयूरमुकुटादिविभूषितम् दुष्टनिग्रहकर्तारं भक्तानुग्रह
मिधानं तं देवमात्मनि चिन्तयेत् ॐ ह्रौं

२

।।२।।

3

ॐ ज्वालाचक्राय बलाय कवचाय हुम् ॐ असुरान्तकचक्राय तेजसे नेत्राभ्यां
वौषट् ॐ सर्वलोकरक्षणचक्राय वीर्याय अस्त्राय फट् ॐ सं नमः इति शि
रसि ॐ हं नमः इति नयनयोः ॐ स्रां नमः इति वदने ॐ रं नमः इति हृदये
ॐ नमः इति गुह्ये ॐ फं नमः इति पादसन्धिषु भूर्भुवः स्वरोमिति दिग्बं
धः परितः अग्निप्राकारं तस्य सकलरक्षणार्थं त्रैलोक्यं रक्षरक्ष ॐ लं
पृथिव्यात्मने सुदर्शनाय हेतिराजाय नमः ॥ गन्धं धारयामि हं आकाशा
त्मने सुदर्शनाय हेतिराजाय नमः पुष्पाणि समर्पयामि यं वायु आत्मने
श्रीसुदर्शनाय हेतिराजाय नमः रं ज्योतिरात्मने श्रीसुदर्शनाय हेतिरा
जाय नमः दीपं दर्शयामि वं अमृतात्मने श्रीसुदर्शनाय हेतिराजाय न
मः अमृतात्मने नैवेद्यं निवेदयामि सं सर्वात्मने सर्वोपचारपूजां समर्पया